- Title – कुवलयानन्द
- Accession No – Title –
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – कपटत्वेन वस्तु सदृशां तरपरक्त –
- End – आदि गुणावाची तत्रान्पदीयागुण –
- Colophon-
- Illustrations -
- Source -
- Subject - साहित्य
- Revisor -
- Author -
- Remarks- 44, 45, 46, 47, 48, 49, 61, 62, 63

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1

कपदत्वेन वस्तुसदर्थान्तरपरत्वरूपान्तरमाद्दाय समालंकारोऽस्त्येव श्लेषलक्ष्यास दिङ्मा५वाग्निप्रती
तिमात्रेण विगतमुदाहरणम् यथा वा॰ सन्त्यं तपःसुगत्यैयत्नशंभुसुर विंप्रतीदंतेने अत्र भवति
सुगतिमतं त्वत्पदद्रूपं समस्तकमनीयम्॰ ६८ विचित्रं तत्प्रयत्नश्चेद्विपरीतफलेच्छया नमं
ति सन्तः त्रैलोक्यादपि लब्धुं समुन्नतिम् ६९ यथा वा मलिनयितुं खलवदनं विमलयति
जगन्ति देवकीर्तिस्ते मित्राल्हादं कर्तुं मित्राय खलु दुह्यति प्रतापोऽपि ७० अधिकं पृथुला
धारादाधेयाधिक्यवर्णनम् ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः ७१ अत्र युगमहाजा
लौघेऽनंतानि ब्रह्माण्डानि बुद्बुदायमानानि इत्याधारस्यापि विशालत्वं प्रदर्श्य तत्र न मान्ती
त्याधेयानां गुणानामाधिक्यवर्णितं यथा वा॰ युगान्तकालप्रतिसंहृतात्मनो जगंति यस्यां स
विकाशमासत तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः ७२ पृथ्वाधेयाद्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कु०
४४

दा. धाराधिक्यं तदपि तन्मतं क्रियद्वा गुरुत्वयत्नेन विश्राम्यंति गुणास्तव ७३ अत्र गुणाने इति प्रत्यन्तदृढ
भ्रमणो वै भवत्वेनोक्तानां गुणानां विश्राम्यंतीत्यसंबाधावस्थानोक्ताधारस्य वा गुरुत्वगुणाश्रा २
धिक्यं वर्णितम् यथा वा. अहो विशालभूपाल भुवनत्रितयोदरम् माति मातुमशक्योपि य
ग शोराशिर्यदत्र ते ७४ अत्रोदाहरणे द्वयेपि क्रियद्वा गुरुत्वाहो विशालमिति चाधारयोः प्रशंसा क्रि
यते तथापि तन्नत्वेन सिद्धवत्कृतयोः शब्दब्रह्मभुवनोदरयोर्गुणयशोराश्यधिकरणत्वेनाधि
क्यकल्पनयैव प्रशंसा क्रियते इति तत्प्रशंसाप्रस्तुतगुणयशोराशिप्रशंसायामेव पर्यवस्य
ति. सूक्ष्मत्वसूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता मणिमालोर्मिकाने द्यकरे जपवटायते ७५
अत्रमणिमालामयोर्मिकानाव दंगुलिमात्रपरिमितत्वात्सूक्ष्मासापि विरहिण्याः करे कंक
णवत्प्रवेशितात्तस्मिन् जपमालावल्लंघते इत्युक्त्याकरस्य विरहकार्श्यादति सूक्ष्मता दर्शिता.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथा वा॰ यन्मध्यदेशादपि ते सूक्ष्मं लोलाक्षि दृश्यते मृणालसूत्रमपि ते नैव माति स्तनांतरे ७६ 3
अन्योन्यं नाम यत्र स्यादुपकारः परस्परं त्रियामा शशिना भाति शशी भाति त्रियामया ७७ यथा
वा॰ यथोर्द्ध्वाक्षः पिबत्यंबु पथिको विरलांगुलिः तथा प्रपापालिकापि धारां वितनुते तनुम् ७८
अत्र प्रपापालिकायाः पथिकेन स्वशक्त्या पानीयदानव्याजेन बहुकालं स्वमुखावलोकनेन अ-
भिलषंत्या विरलांगुलिकांजलिकरणेन चिरं पानीयदानानुवृत्तिसंपादनेनोपकारः कृतः
तथा प्रपापालिकयापि स्वमुखावलोकनमभिलषतः पथिकस्य धारातनूकरणेन चिरं पानी-
यदानानुवृत्तिसंपादनेनोपकारः कृतः अत्रोभयोर्व्यापाराभ्यां स्वस्योपकारसंभवेपि परस्पर-
स्योपकारोपि न निवार्य्यते॰ विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम् गतेपि सूर्ये दीपस्था
स्तमश्छिंदंति तत्कराः ७९ यथा वा॰ कमलमनंभसि कमले कुवलये तानि कनकलतिका-
याम् सा च सुकुमारसुभगेत्युत्पातपरंपरा केयम् ८० अत्राद्ये सूर्यस्य प्रसिद्धाधारस्याभावे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कु० ४५

पितृत्करणामन्यत्रस्थितिरुक्ता द्वितीये सलिलस्य प्रसिद्धाधारस्याभावेपि कमलकुवलयोरन्यत्राव 4
स्थितिरुक्ता क्वचित्प्रसिद्धाधाररहितानामाधारांतरनिर्देशं विनैवाप्रलयमवस्थितिर्वर्णिता० य
था वा दिवमप्युपयातानामाकल्पमनल्पगुणगणायेषाम् रमयंति जगंति गिरः कथमिव कवयो
नतेवंद्याः ८१ अत्र कवीनामभावेपि तद्गिरामाधारांतरनिर्देशं विनैवाकल्पमवस्थितिरुक्ता० विशेषः
सोपि यदेकं वस्तु [illegible] नेकत्र वर्ण्यते अंतर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव मे ८२ यथा वा० हृदया
न्नापयातोसि दिक्षु सर्वासु दृश्यसे वत्स राम गतोसीति संतापेनानुमीयते ८३ किंचिदारंभतोशा
क्यवस्त्वंतरकृतिश्च सः त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणम् ८४ यथा वा० स्फुरदद्भुतरूप
मुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यम् विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्प
तिश्च अत्राद्ये राजदर्शनारंभेण कल्पवृक्षदर्शनमशक्यवस्त्वंतरकृतिः द्वितीये राजसृष्ट्यारंभेण
मनोभवादिसृष्टिरूपाशक्यवस्त्वंतरकृतिः स्याद्व्याघातोन्यथाकारि तथाकारि क्रियेत चेत् यैर्जे एम: ४५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गम्यीयते हंति तैरेव कुसुमायुधः ८६ यद्यत्साधनत्वेन लोकतोवगतं तत्केनचिद्विरुद्धसाधनं क्रियेत
चेत्स व्याघातः यद्यत्साधनतया केनचिदुपात्तं तदन्येन तत्प्रतिद्वंद्विना विरुद्धसाधनं क्रियेत चेत्सो
ऽपि व्याघातः तत्राद्य उदाहृतः द्वितीयो यथा दृशा दग्धं मनसिजं जीवयंति दृशैव याः विरूपाक्षस्य
जयिनीस्ताः स्तुवे वामलोचनाः ८७ सौकर्येण निबद्धापि क्रिया कार्यविरोधिनी दयाचेद्बाल इति
मय्यपरित्याज्यस्तरां वने ८८ कार्यविशेषनिष्पादकतया केनचित्संभाव्यमानादर्थादन्येन कार्यविरो
धिनी क्रिया सौकर्येण समर्थ्यते चेत्सोऽपि व्याघातः कार्यविरुद्धक्रियायां सौकर्यं कारणस्य सुत
रां तदनुगुणं यथा जैत्रयात्रोन्मुखेन राज्ञा युवराजस्य राज्यरावस्थापने यत्कारणेन संभावितं
बालत्वं पुत्रस्य तन्निरुद्धस्य सहजस्यैव कारणेन यात्रायां युवराजेन परित्यागस्यायुक्तत्वं दर्शयता सम
र्थ्यते यथा वा लुब्धो न विसृजत्यर्थं नरो दारिद्र्यशंकया दातापि विसृजत्यर्थं तयैव ननु शंक
या ८९ अत्र पूर्वार्द्धे प्रतिपादितनिरूपमो वैचनेऽनिलद्रव्यमानगतिः गुंफः कारणमाला स्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शते x

कु० द्यथाप्राक्प्रांतकारणैः नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ९० उत्तरोत्तरकारणभूतपूर्वपूर्वैः 6
५६ पूर्वपूर्वकारणभूतोत्तरोत्तरैर्वा वस्तुभिः कृतो गुंफः कारणमाला तत्राद्योदाहृता । द्वितीया यथा ।
भवंति नारकाः पापात्पापं दारिद्र्यसंभवम् दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेत् ९१ गृहीत
मुक्तरीत्यार्थश्रेणिरेकावलिर्मता नेत्रे कर्णांत मगम विश्रांते कर्णौ दोःस्तंभदोलिनौ दोःस्तंभौ जानु
पर्यंतप्रलंबनमनोहरौ जानुनी रत्नमुकुराकारे तस्याहिभूभुजः ९३ उत्तरोत्तरस्य पूर्वपूर्वविशे।
षणभावः पूर्वपूर्वस्योत्तरोत्तरविशेषणभावो वा गृहीतमुक्तरीतिः तत्राद्यः प्रकार उदाहृतः द्वितीयो य
था दिक्कालात्मसमैव यस्य विभुता यस्तत्र विद्योतते यत्रामुष्य सुधीभवंति किरणाः राशेः स यासा
मभूत् यस्त्यित्तमुखः सुयोस्य हविषे यस्तस्य जीवातवे वोढा यद्गुणमेष मन्मथरिपोस्ताः पांतु
मूर्तयः ९४ दीपकैकावलीयोगान्मालादीपकमिष्यते स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थि राम
तिः ९५ अत्र स्थितिरितिपदमेकं स्मरेण तस्याः हृदये स्थितिः कृता तेन तस्याः हृदये तत्त्वयि स्थि ५६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तिः कृतेत्येवं वाक्यद्वयान्वयः अनेन दीपकं गृहीतमुक्तरीतिसद्भावादेकावली चेति दीपकैकावलीयो।
गः यथावा संग्रामांगणे नु भवता चापे समारोपिते देवाकर्णय येन येन सहसा यद्यत्समासादितम् सा २४
कोदंडेन शराः शरैररिशिरस्तेनापि भूमंडलं तेन त्वं भवता च कीर्त्तिरतुला कीर्त्या च लोकत्रयम् ९६
अत्र येन येन सहसा यद्यत्समासादितमिति संक्षेपवाक्यस्थितमेकसमासादितपदं कोदंडेन शरा
इत्यादिषु षट्स्वपि विवरणवाक्येषु तदुचितविवरणलिंगवचनपरिणामेनान्वेतीति दीपकम् श
रादीनामुत्तरोत्तरं विशेषणभावादेकावली चेति दीपकैकावलीयोगः उत्तरोत्तरमुत्कर्षः सार इ
त्यभिधीयते मधुरं मधु तस्माच्च सुधा तस्याः कवेर्वचः ९७ यथावा अन्तर्विलोलस्त्रिलोकी निवस
ति फणिनामीश्वरे सोपि शेते सिंधोः सोप्येकदेशे तमपि चुलुकयांचकार योनिश्चकोर धत्ते खद्यो
तलीलामयमपि नभसि श्रीनृसिंहक्षितींद्र त्वत्कीर्त्तेः कर्णनीलोत्पलमिदमपि च प्रेक्षणीयं वि
भाति ९८ अथ श्लाघ्यगुणोत्कर्षः श्लाघ्यगुणोत्कर्षो यथा तृणाल्लघुतरस्तूलस्तूलादपि च या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चक्रः वायुना किं न नीतो मां मामयं याचयिष्यति २९९ उभयरूपो यथा गिरिर्महान्गिरेरब्धिर्महानब्धे
र्नभो महत् नभसोपि महद्ब्रह्म ततोप्याशा गरीयसी ३०० नत्र ब्रह्मपर्यंतं महत्त्वं श्लाघ्यगुणाः प्रकृ
तार्थत्वाशायाम श्लाघ्यगुणाः यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः शत्रुं मित्रं विपत्तिं च ज
यरंजय भंजय १ यथा वा शिरसां किं प्रपन्नानि विषवन्मारयंति च नत्यज्यंते भज्यंते कृपणेन
धनानि यत्न २ अयं क्रमालंकार इति केचिद्व्यवजह्रुः पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः
पंकं मुक्त्वा गतेनाचंद्रं कामिनीवदनप्रभा ३ अत्रैकस्याः कामिनीवदनप्रभायाः क्रमेणापन्न
चंद्ररूपानेकाधारसंश्रयणं पर्यायः यद्यपि पद्मसंश्रयणं कृतेनोनोक्तं न पापि मुक्त्वेति पदेन त्या
गान्यथा प्राक्संश्रयणादेवैषा पर्यायनिर्वाहः अत एव श्रेणीबंधस्त्यजति तनुतां सेवते मध्यभागः
लोचना २४ पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्यां धत्ते वक्षः कुचसचिवतामद्वितीयं त्वदास्यं त्वद्गात्राणां
गुणविनिमयः कल्पितो यौवनेन ४ इत्यत्र काव्यप्रकाशकार उदाजहार सर्वत्र शब्दपर्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योयथा॰ नन्वाश्रयस्थितिरियंतव कालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा प्रागर्णवस्य हृद 9
ये वृषलक्ष्मणोऽथ कण्ठे धुना वससि वाचि पुनः खलानाम् ५ सर्वोप्ययं क्रमपर्यायः संकोचपर्या
योयथा प्राप्तक्षितित्वा ‑ वसुधामशेषां छायासु विश्रम्य तनूरुहाणाम् प्रोद्दिंगन्तेसंप्रति तिग्मभा
नोशैलंयशनैरंतरयामयासीत् ६ अत्रशैलस्योत्तरमाधारसंकोचात्संकोचपर्यायः विका
शपर्यायोयथा विंबोष्ठ एव रागस्तेतन्वि पूर्वमदृश्यत अधुनामृगशावाक्षि हृदयेप्येष दृश्य
ते ७ अत्र रागस्य पूर्वाधारपरित्यागेनाधारान्तरसंक्रमणमिति विकाशपर्यायः एकस्मि
न्नयद्यनेकं वा पर्यायः सोपि संमतः अधुना पुलिनं तत्र यत्र स्रोतः पुराऽजनि॰ ८ यथा वा॰
पुराऽभूदस्माकं प्रथममविभिन्ना तनुरियं ततोऽनु त्वं प्रेयान्वयमपि हताशाः प्रियतमाः इदानीं
नाथस्त्वं वयमपि कलत्रं किमपरं हतानां प्राणानां कुलिशकठिनानां फलमिदम् ९ अत्र दंपत्योः
प्रथममभेदः ततः प्रेयसीप्रियतमभावः ततो भार्यापतिभावइत्याधेयपर्यायः परिवृत्तिर्वि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भ्य

कु० निमयोन्यूनाधिकयोर्मिथः नग्राह्यैकं शारंभन्त्राकटान्तास्तरिवुश्रियः १० यथावा॰ नस्यचातिव
५८ यसोजटायुषः स्वर्गिणः किमिव शोच्यतेधुना येनजर्जरकलेवरव्ययात्क्रीतमिंदुकिरणोँ। ज्वलं
यशः ११ परिसंख्या निषिध्यैकमेकस्मिन्वस्तुयंत्रणं स्नेहक्षयः प्रदीपेषु न स्वांतेषु नतभ्रुवाम्
१२ यथावा॰ विलंघयति श्रुतिवर्त्म यस्यां लीलावतीनां नयनोत्पलानि॰ बिभर्ति यस्यामपि व
क्रिमाणमेको महाकालजटार्द्धचंद्रः १३ आद्योदाहरणे निषेधः शाब्दः द्वितीये त्वार्थः वि 10
रोधेतुल्यबलयोर्विकल्पालंकृतिर्मता सद्यः शिरांसि चापान्वा नमयंतु महीभुजः १४ अत्र
संधिविग्रहप्रमाणप्राप्तयोः शिरश्चापनमनयोर्युगपदुपस्थितयोर्युगपत्कर्तुमशक्ययो
र्विकल्पः यथावा पतत्यविरतं वारि नृत्यंति च कलापिनः अद्य कांतः कृतांतो वा दुःखस्यां
तं करिष्यति १५ प्रियसमागमनं चेन्न मरणमाशंकनीयं मरणे न प्रियसमागमसंभव इति
नयोराशंसायां विकल्पः वस्तूनां युगपद्भावभाजां गुंफः समुच्चयः नश्यति पश्चात्ति दंतिनस्य
निचम्भवद्विषः १६ अविरोधेन संभावितयौगपद्यानां गुंफः समुच्चयः यथावा विभ्राण राम:
५८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हृदयेत्वयाविनिहितंप्रेमाभिधानंनवंशल्यंयद्धिदधातिसाविधुरितासाधोत्तदाकूर्पिताम् प्रोतेशुष्य।
तितान्मयतिप्रलपतिप्रम्लायतिप्रेंषतिभ्राम्यत्युच्छ्वसितिप्राणस्यतिगलत्युन्मूर्च्छतित्रुस्यति १७ अ
त्रकासांचित्क्रियाणांकिंचित्कालभेदसंभवेपिशतपत्रपत्रशतभेदन्यायेनयौगपद्यंविरहा
तिशयद्योतनायविवक्षितमितिलक्षणानुगतिः अहंप्राथमिकाभाजामेककार्यान्वयोपिसः
कुलंरूपंवयोविद्याधनंचमदयंत्यमुम् १८ यत्रैकः कार्यसिद्धिहेतुत्वेनप्रक्रांतस्तत्रान्येपि
यद्यहमहमिकयाखलेकपोतन्यायेनसिद्धिंकुर्वंतिसोपिसमुच्चयः यथामदेत्राभिजात्यमेकं
समग्रंकारणेनद्धदेवरूपादिकमपितत्साधनत्वेनावतरति यथावा प्रदानंप्रच्छन्नंगृहमुपगते
संभ्रमविधिर्निस्तत्त्सेकोलत्त्यामनभिभवगंधाःपरकथाः प्रियंकृत्वामौनंसदसिकथनंचाप्यु
पकृतेःश्रुतेऽत्यंतनासक्तिःपुरुषमभिजातंप्रथयति १९ कमिकेकागतानांगुंफःकारकदी
पकम् गच्छत्यागच्छतिपुनःपांथःपश्यतिपृच्छति २० यथावा निद्रातिस्नातिभुंक्तेचलतिक

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कु० ४१

चभरान्शोषयत्यंतरास्ते दीव्यन्त्यहैर्गैर्दिनमवसरेभूयस्त्वायाहियाहि इत्युद्दंडैः प्रभूणामसकृदीधकः।
नैर्वैरिनान्क्वारिदीनान्वश्यास्मानर्धिकन्येसरसिरुहैचामंतरंगेरपांगैः २१ आद्योदाहरणेऽभुतस्यपां
थस्यकर्त्तृकारकस्यगमनादिष्वन्वयः द्वितीयेत्वध्याहृतस्यप्रभोः कर्त्तृकारकस्यैकस्यानेकादिष्व
न्वयः इत्येकस्यानेकवाक्येष्वन्वयेन कारकदीपकद्ध्यापत्त्याकारकदीपकम् प्रथमसमुच्चय
प्रतिद्वंद्वीदम् समाधिः कार्यसौकर्येकारणांतरसन्निधेः उक्तं द्विताचतरुणीजगामासंचभा।
नुमान् २२ यथावा मानमस्यानिराकर्त्तुपादयोर्मेपतिष्यतः उपकारायदिष्ट्येतदुदितंघनग
र्जितम् २३ केनचिदारब्धस्यकार्यस्यकारणांतरसन्निधानाद्यत्सौकर्यंतत्समाधानात्स
माधिः द्वितीयसमुच्चयप्रतिद्वंद्वीत्र्ययंसमाधिः तत्रबहूनांप्रत्येकसमर्थानांखलेकपोतन्याये
नयुगपत्साधनार्थमवतारः अत्रत्वेकेनसमारिप्सितेकार्येन्यस्यकाकतालीयन्यायेनापति
तस्यतत्सौकर्याधायकत्वमात्रमत्रोदाहरणं उक्तं द्वितेन्युत्कंठैवहिप्रियाभिसारेपुष्कलेकारणं न

12

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्रदर्शनोत्कंठितस्य दोषगुणयोर्गुणत्वदोषत्वाभिमान एवात्र श्लोके निबद्धः यथा वा । संतः सच्चरितोदय।
व्यसनिनः प्रादुर्भवद्यंत्रणाः सर्वत्रैव जनापवादचकिता जीवंति दुःखं सदा अव्युत्पन्नमतिः कृतेन न
न सता नैवासता व्याकुलो युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः ८२ दंडी त्वत्रोदाज।
हार युवैष गुणवान् राजा योग्यस्ते पतिरूर्जितः रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि ८३
चपलो निर्दयश्चासौ जनः किं तेन मे सखि आगःप्रमार्जनायैव चाटवो येन शिक्षिताः ८४ अ
त्राद्यश्लोके राज्ञो वीर्योत्सेकस्तुतिः कन्यायां निरंतरं भोगान्निर्विवृत्सो दोषत्वेन प्रतिभासता
भिन्यभिप्रेत्य विदग्धया सख्या राजकोपपरिजिहीर्षया स एव दोषो गुणत्वेन वर्णितः उत्तर
श्लोके सखीभिरुपदिश्यमानं कर्त्तुमशक्नुयापि नाप्तामग्रतो मग्रतो मानपरिग्रहहेतुगुणं प्र
तिज्ञायनदनिर्वाहमाशंकमानया सखीनामुपहासं परिजिहीर्षंत्या नायिकया तत्र स चाटु
कारत्वगुण एव दोषत्वेन वर्णितः न चाद्यश्लोके स्तुतिर्निंदापर्यवसायिनी द्वितीयश्लोके

नायिका
याः सखीउ
क्तिवचनं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कु०
ध

निंदास्तुतिपर्यवसायिनीति व्याजस्तुतिरायं कनीया राजप्रकोपादिपरिहारार्थमिह निंदास्तुत्योर
न्याविद्धिनलेशतरवोद्घाटनेन ततो विशेषादिति वस्तुतस्तु इह व्याजस्तुतिसद्भावेपि न दोषः न
लेनाव तालेशमात्रस्य व्याजस्तुत्यन्तर्भावः प्रसज्यते तदसंकीर्णयोरपि लेशोदाहरणयोर्दर्शित
त्वात् नापि व्याजस्तुतिमात्रस्य लेशान्तर्भावः प्रसज्यते भिन्नविषयव्याजस्तुत्युदाहरणेषु क
स्त्वं वानरराम राजभवने तल्पे स्वार्थसंवाहको यद्धक्कं मम कुमीदत्तसेनधानिनो वृषेन चाद्रूमस्या
ऽस्त्यादिषु दोषगुणीकरणस्य गुणदोषीकरणस्य चाभावात् तत्रान्यगुणदोषाभ्यामन्यत्र गुण
दोषयोः प्रतीतेर्विषमेकोपि । इंदोर्लक्ष्म त्रिपुरजयिनः कंठमूलं मुरारिर्दिङ्नागानां मदजलमषी
भांजि गंडस्थलानि अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्तान्याभासंते वद धवलितं किं य
शोभिस्त्वदीयैः ८५ इत्याद्युदाहरणेषु लेशास्पर्शनात् अत्रेंदुलक्ष्मादिधवलीकरणाभावदोषगु
णत्वेन न पर्यवस्यति किंतु परिसंख्यारूपेणान्येभ्योन्यत्र सर्वं धवलितमित्यन्ययोगः प्रतीय

राम:
ध

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ते कश्चिद्व्याजस्तुतिमुदाहरन्तो गुणदोषीकरणस्य व्याजस्तुतेर्विषयान्तरमपि दर्शयन्ते यथा सर्वदा सर्वदो
ऽसीति मिथ्यात्वं स्तूयसे बुधैः । नारयो लेभिरे पृष्ठं न वक्षः परयोषितः ॥ ८६ ॥ अत्र हि वाच्यया निंदया
परिसंख्यारूपेण न तेनान्यत्स्तवमभिमतमर्थिनां दीनाराद्दिदीयत इति स्तुत्यंतरमपि प्रतीयते
एवं च ये शूद्रदाहरणेषु कस्ते शौर्यमदो यो कुभित्यादि गुणदोषादिषु गुणदोषीकरणादिकमेव
व्याजस्तुतिरूपतया वर्ति(?)तंते अत्र लेशव्याजस्तुत्योः संकरो ऽस्तु इत्ययमेव हि व्याजस्तुत्यप्रस्तुत
प्रशंसयोरपि प्राक्संकरो दर्शितः । सूच्यार्थसूचनं मुद्राप्रकृतार्थपरैः पदैः । नितंबगुर्वी तरुणी
दृग्युग्मविपुला च सा ॥ ८७ ॥ अत्र नायिकावर्णनपरेण युग्मविपुलापदेनास्यानुष्टुभो युग्म
विपुलानामरूपसूच्यार्थसूचनं यद्यप्यत्र ग्रंथे वृत्तिनाम्नो नास्ति सूचनीयत्वं न चाप्यसो
नरार्हस्य लल(?)लक्षणयुक्तछंदः शास्त्रपातित्वेन न तस्य सूचनीयत्वमस्त्येवं तदभिप्रायेण ल

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कु० त्यलक्षणं योऽयम् एवं रत्नमालायां नक्षत्रनामनिवेशनेन नक्षत्रनाथिकजात्यादिसूचनं नक्षत्रा
६२ दिमालायामग्न्यादिदेवतानामभिनैन्नन तत्र सूचनमित्याद्यवयमेवालंकारः एवं नाटके
भुवदप्रमाणार्थसूचनेऽपि क्रमिकप्रकृतार्थानां न्यासं रत्नावलीं विदुः चन्द्रास्यः पतितं
दन्याः सर्वेद्वत्स्त्वं महीपते ८८ अत्र चन्द्रास्यादिपदैर्वर्णनीयस्य ब्रह्मविष्णुरुद्रात्मतापि प्र
तीयते इति प्रसिद्धसहपाठानां ब्रह्मादीनां क्रमेण नामनिवेशनं रत्नावली० यथा वा० रत्याग्र
प्रियतां छने कठिनतावांसे रसालिंगिते प्रक्लादैकरसे क्रमादुपचिते भूमद्भुकत्वापहे कोक
स्पर्द्धिनि भोजभाग्जिजनितानंगेरवलीनोन्कुरवे भाति श्रीरमणावतारदशकं बाले भवत्याः स्त
ने ८९ प्रसिद्धसहपाठानां प्रसिद्धक्रमाननुसरणेऽप्ययमेवालंकारः यथा० यस्याविर्वह्निमयो
हृदये भुजलमयो लोचनपुटेषु मारुतमयः श्वसितेषु क्ष्मामयोंगेष्वाकाशमयः शून्यता
सुपंचमहाभूतमयो मूर्त्तेर्द्वान्द्दश्यत निहतसामंतानां तः पुरेषु प्रतापः ९० एवमश्लोक

16

राम: ६२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पालनवग्रहादीनां प्रसिद्धसहपाठानां यथाकथंचित्प्रकृतोपमानोपरंजकत्वादिप्रकारेण नि
वेशने रत्नावल्यलंकारः प्रकृतान्वयं विना क्रमिकनन्नन्नाम्नां विश्लेषभंग्या निवेशने प्येय
मेवालंकारः तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः पद्मरागायते नासा मौक्तिकं ते परत्वि
षा ९१ यथा वा वीरत्वद्विपुरमणीपरिधानं ते पल्लवानि संस्पृश्य नृहरति वनभुवि निजकर
रुहरुचिरवचितानि पांडुपत्रधिया ९२ पुनः स्वगुणसंप्राप्तिः पूर्वरूपकं दाहृतम् हरकंठां
शुलिप्तोपि शेषस्त्वद्यशसा सितः ९३ यथा वा· विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः प
रितः स्फुरंत्या रत्नैः पुनर्यत्र रुचा स्वचस्वामानिन्यिरे वप्राकरीरनीलैः ९४ अप्रयमेव तद्गुणाद्
त्तिके चिदव्याजकुः पूर्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि दीपे निर्वापिते प्यासीत्कांचीर
त्नैर्महन्महः ९५ लदतेचकारान्पूर्वेदयमिति तिलदपवाचकपदानुवृत्तिः यथा वा· हारस्व।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कु०
६३

ङ्क्षिभिराद्धृतं बहिरपि प्रस्निग्ध गंडैर्गजै रंतः कंचुकिभिर्लसन्मणिगृहैः राधाप्रसिनाभ्रमयः आक्रां
तं महिषीभिरेव शयने त्वद्विद्विषां मंदिरे राजन्सैव चिरंतनप्रणयिनी शून्येपि राज्यस्थितिः २६
संगतानन्यगुणानंगीकारमाहुरतद्गुणम् चिरं रागिणि मच्चित्ते निहितोपि न रंजयसि २७ य
थावा गंगाभोगे विहरति मदः पिछले दिग्गजानां वैरिस्त्रीणां नयनकमले खंजनानि प्रमा
र्ष्टि यद्यप्येषा हिमकरा करादैन्यमोवस्ति कीर्त्ते कीर्त्तिर्दिक्षु स्फुरति तदपि श्रीनरसिंह दिती
द्र २८ ननु वान्यगुणोनान्यगुणोदयानुदयरूपाभ्यामुक्तासावज्ञालंकाराभ्यां तद्गुणा
तद्गुणयोः को भेद उच्यते उक्तासावज्ञालंकारे यो गुणशब्दो दोषप्रतिपदवाची अन्यगुण
नान्यगुणोदयानुदययोर्हेतुस्यैव गुणस्य संक्रमणासंक्रमणे किंतु सद्रूपो रूपदेशेन
सदसच्छिष्यो ज्ञानान्यगुणानुत्पत्तिवृत्तेर्तद्गुणाजन्यत्वेन संभावितयोर्गुणं नरयोरुन्य
न्यनन्यचौ । नतद्गुणातद्गुणयोः पुनर्गुणशब्दो रूपरसगंधादिगुणवाची नतुअन्यदीयगुण रा०म०
६३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA